International Journal of Sanskrit Research 2020; 6(1): 28-30

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 28-30
© 2020 IJSR
www.anantaajournal.com
Received: 20-11-2019
Accepted: 24-12-2019

**डॉ० शिव कुमार मिश्र**
संस्कृतविभागाध्यक्षः
कुँवरसिंह महाविद्यालयः,
लहेरियासराय ल० ना० मि०
विश्वविद्यालय, दरभंगा, बिहार,
भारत।

**Corresponding Author:**
**डॉ० शिव कुमार मिश्र**
संस्कृतविभागाध्यक्षः
कुँवरसिंह महाविद्यालयः,
लहेरियासराय ल० ना० मि०
विश्वविद्यालय, दरभंगा, बिहार,
भारत।

# संस्कृतवाङ्मये पर्यावरणसंरक्षणम्–एकमनुशीलनम्

**डॉ० शिव कुमार मिश्र**

**प्रस्तावना**

राष्ट्रेषु भारतं रम्यं रम्यः संस्कृतवाङ्मयः।
तत्रापि संस्कृतिर्रम्या धन्याः संस्कृतसाधका।।
भाषैका भारतीयानां देवभाषेति भण्यते।
स्वतः संस्कारयुक्तत्वात्संस्कृतं चापि कथ्यते।।
अपि च–
भावात्मकैकतास्माकी संस्कृतेनैव रक्षिता।
तस्मात्संस्कृत भाषायाः स्वाध्यायः प्रविधीयताम्।।

तथास्तु। निसर्गतः आवेदेभ्यः आभिजातसंस्कृतवाङ्मयं यावत् सर्वत्रापि पर्यावरणस्य रक्षणोपायाः सम्यक् चित्रिताः। एकतो यथा पर्यावरणं वैदिकवाङ्मये चित्रितास्तथैव संस्कृतवाङ्मयेऽपि पर्यावरणस्य विविध रक्षणोपायाश्चित्रिताः। अस्मिन् क्रमे पर्यावरणरक्षार्थं जन्तुपादपयोर्मध्ये सर्वथा सामञ्जस्यं सन्तुलनं च सर्वतोभावेन समवेक्षितं वरीवर्तीति निश्चप्रचम्। यथार्थतः विविधप्राणिभिः श्वसनक्रमे प्राणवायुः (आक्सीजनम्) गृह्यते तथा निःश्वासक्रमे दूषितवायुः (कार्बनडाईआक्साईड) वायुमंडले विमुच्यते पुनस्तदेव दूषितवायुः वृक्षैः पादपैश्च श्वसनक्रमे गृह्यते। अयमेव क्रमः सर्वदैव चलायमानो भवति। वस्तुतस्तु अयमेव प्राकृतिक पर्यावरणस्य क्रमः। अस्मादेव कारणात् पर्यावरणरक्षार्थं वृक्षाः पादपाश्च सर्वथा रक्षणीयाः। अनेनैव प्रकारेण पर्यावरण सन्तुलनं स्यादिति नास्ति कश्चन विशंवादः। तद्यथाा ऋग्वेदेऽपि निगदितम्–
''माध्वीर्नः सन्त्वोषधीः........मधुमान् नो वनस्पति।'' [1]
एवम् पादपानां रोपणं संवर्द्धनं संरक्षणं च मानवानां यथा पूर्वं परमं कर्त्तव्य मासीत् तथैव आधुनिक वैज्ञानिक कालेऽपि अस्माकं समेषां राष्ट्रभक्तानां परमं कर्त्तव्यं वरीवर्तीति निश्चप्रचम्। परवर्तिनि पौराणिके साहित्ये वृक्षपूजनं वृक्षमहोत्सवं च उपदिशद्भिराचार्यैः वृक्षाणां महत्ता मुक्तकण्ठेन प्रतिपादिता। तेषां प्रतिपत्तिरासीत् यत् आरोपिता वृक्षा मानवं पुत्रवत् आजीवनं सेवन्ते। तथा च पुराणवचनम्–
''यथा सुपुत्रः कुलसमुद्धरेद्धि यथाति कृत्स्नान् नियम प्रयत्नान्।
तथा प्ररोपाः फल पुष्पभूताः स्वं स्वामिनं नरकाद् उद्धरन्ति।।'' [2]
न केवलमेतावदेव अपितु वृक्षरोपको नरो ब्रह्मलोकं गत्वा सुखमश्नुते। यथा निगदितं मत्स्यपुराणकारेण–

''यश्चैकमपि राजेन्द्र! वृक्षं संस्थापयेन्नरः।
सोऽपि स्वर्गे वसेद्राजन् यावदिन्द्रायुतत्रयम्।। [3]

निसर्गतः वृक्षाणां सृष्टिरादौ तथा चावशिष्टजगतो निर्माणं पश्चात्सञ्जातम्। [4] एवमेव श्रीमद्भागवत्माहात्म्ये –तरवोऽमिनेदुः इति सूक्त्या सूच्यते यद्वृक्षाः वेदव्यासं प्रत्युत्तरयन्, अतः वृक्षा अपि प्राणवन्तः श्वासोच्छ्वासशीलाश्च सन्ति, इत्यस्मिन् विषये न कापि संशितिः।
अस्मिन् क्रमे पर्यावरणदृष्ट्या अश्वत्थवृक्षस्य महत्त्वं सर्वोपरि वर्त्तते। अस्य वृक्षस्य नीचैः स्थितेन मनः प्रसन्नतां याति। इमे वृक्षाः सर्वाधिकं प्राणभूतं वातं प्राणिनां कृते उत्सृजति एवं दूषितं कार्बनडाईऑक्साईड वातं प्रभूतम् अवशोषयतीति। वस्तुतस्तु प्राकृतिकसम्पदासु विशेषेण वृक्षाणामेव गणना सञ्जाता। ईश्वरीय सत्तायां सकल प्राणिनां वृक्ष एवाश्रयः। स्कन्दपुराणे भणितम्–

''अश्वत्थ पूजितं सिक्तं सर्वभूत सुखावहम्।
सर्वाभयहरं चैव सर्व पापौघटाहारिणम्।।

अश्वत्थोऽतः सदा सेव्यो मंदवारे विशेषतः।
नित्यमश्वत्थ संस्पर्शात् पाप क्षयं सहस्रधा।। [5]

निसर्गतः ईश्वरः त्रिगुणभेदेन भिन्नं भिन्नं स्वरूपे प्रकृतौ विभाति। प्रकृतिरपि ईश्वरस्येदं रूपं दृष्ट्वा त्रिषु रूपेषु वृक्षाश्रितेन विश्वस्य रक्षति। [6]

''अहमेव त्रिधा भिन्ना तिष्ठानि त्रिविधैर्गुणैः
श्रीमद्भगवद्गीतायामपि प्रोक्तम्–
''अश्वत्थः सर्वरक्षाणाम्।'' [7]

तथास्तु आधुनिकयुगेऽपि पर्यावरणसंरक्षणार्थम् यत्र–तत्र सर्वत्रैव विविधोपाया विधीयन्ते। पर्यावरण प्रदूषणे–जलप्रदूषणम्। वायुप्रदूषणम्, ध्वनिप्रदूषणम् प्राकृतिक प्रदूषर्णेति विशेषेण गणयितुं शक्यन्ते। तत्र सर्वकारैः, विविध संस्थामिश्च विक्षरोपणक्रमा विधीयन्ते। पर्यावरणदिवसमाधृत्य विविधा कार्यक्रमाः अनुष्ठीयन्ते। परन्तु परिणामः सन्तोषप्रदः नावलोक्यते। अस्मिन् क्रमे महान् वैज्ञानिकस्य डॉ. जगदीशचन्द्रमहोदयस्य नाम कथमपि न विस्मर्तुं शक्यतेन महोदयेन ''क्रेस्कोग्राफ'' नामकं यन्त्रम् आविष्कृतम् अनेन यंत्रेण इदं सिद्धं सञ्जायते यत् यथा अस्माकं प्राणिनां कृते संवेदनशीलता वर्त्तते तथैव पादपानां वृक्षार्णां कृते संवेदनशीलत्वं सिध्यति। अतः सर्वे प्राणिनः सर्वे वृक्षाः पर्यावरणरक्षार्थं बद्धपरिकराः सर्वथैव स्वीक्रियन्त इति निश्चप्रचम्। इत्थं च सर्वे वृक्षा एव सर्वविधं पर्यावरण प्रदूषणं संयमयितुं शक्नुवन्ति।
अनेन प्रकारेण वेदोपनिषद्पुराणेषु पर्यावरण संरक्षणस्य विविधोपायाः परिवर्णिताः सम्यक् इति।
अतः परं संस्कृतवाङ्मये पर्यावरणसंरक्षार्थम् कविताकामिनीविलासेन रसमयीपद्धत्याः सम्पोषकेण कविकुलगुरूणा महाकविना कालिदासेन सरस–सरल शैल्याम् स्वकीय ग्रन्थरत्ने ''अभिज्ञान शाकुन्तले'' ''मेघदूत'' च प्रकृति चित्रणेन यादृशाः पर्यावरण रक्षणोपायाः चित्रिताः ताः सर्वथा सर्वदाच श्लाधनीया इति मामकीना मतिरिति।
तत्र महाकविना कालिदासेन यथा ''शाकुन्तले'' प्राणि–पादपार्योर्मध्ये परस्परं सामञ्जस्यं परिचित्रितम् तथैव 'मेघदूतेऽपि'' सर्वत्रैव चित्रितम्। पर्यावरणरक्षण सम्मतम् सूत्रभूतं चिन्तनमिति सर्वथा समवलोकयितुं शक्यते सारस्वतमनीषिभिरिति। शाकुन्तलयस्य चतुर्थांके तेन भणितम्–(

''पातुं न प्रथमं व्यवस्यति जलं युष्मास्वर्पतेषु या
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।'' [8]

अनेनैवक्रमे शाकुन्तले महाकविना कालिदासेन सर्वत्रैव पर्यावरणं सम्पोषितम्।
तथैव महाकविना कालिदासेन स्वकीय ग्रन्थरत्ने ''मेघदूते'' प्रायः सर्वत्रैव पर्यावरणम् रक्षणोपायाश्चित्रिताः। तद्यथा ''मेघदूते'' मेघमार्गवर्णनक्रमे प्रकृति चित्रणमाधृत्य महाकविना कालिदासेन नदी पर्वतवृक्षाणां सम्यक् चित्रणं समुपस्थापितम्। अत्र प्राणिपादपयोर्मध्ये सर्वथा समभावः चित्रितः–

''घूमज्योतिः सलिलमरूतां सन्निपातः क्व मेघः
सन्देशार्था क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं यया चे
कामार्था हि प्रकृति कृपणाः चेतनाचेतनेषु।।'' [9]
अपि च,
''खिन्न–खिन्नः शिखरिषु पदन्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः श्रोतसांचोपभुज्य।।'' [10]

अनेनैव प्रकारेण जम्बुफलैः परिशुद्धं जलम्सुग्राह्यमिति सन्देशः यक्षेण स्वकीय मित्रं मेघम् प्रति उपदिष्टः।
इत्थं च, पर्यावरणरक्षणोपायाः संस्कृतवाङ्मये सम्यक् विश्लेषिताः।

ततः परम् मया महाकविकालिदासस्य अभिज्ञानशाकुन्तलम् मेघदूतम् चाधृत्य सरलशैल्याम् स्वरचितपद्यैः पर्यावरणसंरक्षणम् विलिख्यते सुरभारती सम्पोषकाणाम् राष्ट्रभक्तमनीषिणां परितोषाय। आशासे मदीया रचनेयं संस्कृतजगति उद्बोधनरूपेण सिध्यतीति मामकीना मतिरिति–

कालिदासो महासत्त्वः राष्ट्रकल्याण चिन्तकः।
सुरम्ये शाश्वते राष्ट्रे सदाविजयतेतराम्।।
भूतले भारतं भव्यं भव्यः संस्कृतवाङ्मयः।
तत्रत्या संस्कृतिर्धन्या धन्याः संस्कृतसाधका।।
समृद्धतमभाषायाः सिद्धिप्राप्तो महाकविः।
कालिदासो महासत्त्वः भारते भातु सर्वदा।।
काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।
तत्रापि प्रकृतिर्रम्या पर्यावरणसम्मता।।
राष्ट्रभक्तेन तेनैव सम्पोषकेण संस्कृतेः।
कृतयो विहितास्तेन राष्ट्रकल्याणवा²या।।
आधृत्य राष्ट्रकल्याणं तस्मादेव निसर्गतः।
चित्रणं विहितं तेन पर्यावरणसम्मतम्।।
ज्ञाकुन्तले विशेषेण नाटके विश्वख्यापिते।
पर्यावरणमाधृत्य चित्रणं परिदृश्यताम्।।
मत्रलाचरणे पूर्वं दृश्यतां सर्वथा किल।
यज्ञं वर्णयता तेन चित्रणं प्रकृतेः कृतम्।।
वाहको बह्निरेवास्ति सर्वेषां तीव्रगामिनाम्।
विमानस्याप्ययं वोढा स्पष्टमेव समीरितः।।
अर्थादिदं हि सुस्पष्टं वह्निर्वै प्रथमामता।
हविरस्ति द्वितीया च तृतीया होतृसंज्ञिका।।
पर्यावरणशुद्धयर्थं यज्ञ एव अपेक्षितः।
गीतायामपि सम्प्रोक्तं यज्ञाद्भवति पर्जन्यः।।
सूर्याच्चन्द्रमसौ प्रोक्तौ कालस्य हि विधायकौ।
आकाशः शब्दगुणकः विश्वं व्याप्नोति सर्वथा।।
पृथिवी सर्वबीजानां प्रकृतित्वेन चित्रिता।
वातोऽपि खलु सम्प्रोक्तः प्राणिनां प्राणदायकः।।
अष्टमूर्तिशिवस्यैवं स्वरूपं परिवर्णितम्।
मत्रलाचरणे नूनं कालिदासेन वर्णितम्।।
प्रथमा वह्निरेवास्ति सृष्टिर्नात्रास्ति संशयः।
हविर्वै वह्निहविर्होता त्रीणि तत्त्वानि सन्ति वै।
यज्ञसूत्रानुसारेण सर्वथा पूर्वकालतः।।
अनेनैव प्रकारेण शाकुन्तलेऽनुशील्यताम्।
चित्रणं प्रकृतेर्नूनं सर्वत्रैव निसर्गतः।।
जन्तुपादपयोर्मध्ये सामञ्जस्यं कथं भवेत्।
चिन्तनमिनमाधृत्य कालिदासेन चित्रितम्।।
श्वशूरालय यात्रायां कण्वो वृक्षान् प्रयाचते।
पाययित्वा जलं पुष्पान् पिबतिस्म स्वयं जलम्।।
एषा तनया याति मदीया स्नेहपोषिता।
भवद्मिर्दीयतामाज्ञा शकुन्तलायै स्वभावतः।।
श्रुत्वा ततः कलं रावं कोकिलस्य हि सर्वथा।
अवगच्छति कण्वः स वृक्षाज्ञा सर्वथा किल।।
कालोऽयं हि वसन्तस्य स्पष्टमेवानुमीयते।
अनेनैव प्रकारेण प्रकृतः चित्रणं कृतम्।।
चमत्करोति व्यंग्यार्थः श्रोतृन् नात्रास्ति संशयः।
पदे पदे चमत्कारः सर्वत्रैव प्रतीयते।।
तपोवनं तदेवास्ति प्राणिनां यत्र हिंसनम्।
सर्वथास्ति विरूद्धं वै तपस्याया निरन्तरम्।।
जन्तवो यत्र सार्धं हि निवसन्ति दिवानिशम्।
एवं तपोवनस्यास्ति चित्रणं सर्वतोमुखम्।।
अहिंसाव्रतिनो नूनं सर्व एव तपस्विनः।
इयमेवास्ति मर्यादा सततं वै तपस्विनः।।
सौन्दर्यं प्रकृतेर्नूनं शोभनं सिध्यति ध्रुवम्।
ईदृशं चित्रणं तत्र नाटके परिदृश्यताम्।।

शैवलेनापि सम्बद्धं कमलं शोभते भृशम्।
मलिनेनापि चिह्नेन शोभते वै निशापतिः।।
नायिका नाटकस्यास्य एवमेव शकुन्तला।
बल्कलेनापि सम्बद्धा शोभते स्म निरन्तरम्।।
एवमेव हि सर्वत्र वैशिष्ट्यं तन्महाकवेः।
पर्यावरणमाधृत्य शाकुन्तलेऽनुशील्यताम्।।
तथैव मेघदूतेऽपि चित्रणं तन्महाकवेः।
सिध्यति शाश्वतं नूनं पर्यावरणसम्मतम्।।
प्रकृत्या मण्डितं तत्र पर्यावरण सम्मतम्।
चिन्तनं कालिदासस्य नूनं कस्मै न रोचते।।
अहो महाकविर्नूनं कालिदासोऽस्ति सर्वथा।
चिन्तनं विशेषेण काले विज्ञानसम्मते।
चिन्तनं कालिदासस्य सत्त्वं सिध्यति ध्रुवम्।।
कल्याणं सर्वथाऽस्माकं विश्वबन्धुत्वमेव च।
संस्कृताद् ब्रह्मविद्याया वाचकाद् ब्रह्मसूत्रतः।।
धर्मे ह्यर्थे च कामे च मोक्षे चापि प्रविद्यते।
यत्संस्कृते तदन्यत्र यन्नेहनास्ति न तत्क्वचित्।।
शिवकुमार मिश्रेण विश्लेषितं यथामति।
सर्वथा राष्ट्ररक्षार्थं पर्यावरण रक्षणम्।।
इति शम्

**संदर्भ**


1. ऋग्वेद–1,90,6–8
2. वराहपुराणम्–1701–37
3. मत्स्यपुराणम्–59–17
4. स्कन्दपुराण–6,247–21
5. स्कन्दपुराण–6,247–28–26
6. स्कन्दपुराण–4–22,24–25
7. श्रीमद्भगवद्गीता–10–26
8. अभिज्ञान शाकुन्तलम्–4–9
9. पूर्वमेघदूतम (समस्तम्)
10. पूर्वमेघदूतम (समस्तम्)
11. अभिज्ञान शाकुन्तलम्–1–1(समस्त प्रथमांकः)
12. अभिज्ञान शाकुन्तलम्–1–1(समस्त चतुर्थांकः)